नलोपाख्यानम्

25

बृहदश्व उवाच।

सर्वं विकारं दृष्ट्वा तु पुण्यश्लोकस्य धीमतः।

आगत्य केशिनी क्षिप्रं दमयन्त्यै न्यवेदयत्॥ ३-७४-१ ॥

दमयन्ती ततो भूयः प्रेषयामास केशिनीम्।

मातुः सकाशं दुःखार्ता नलशङ्कासमुत्सुका॥ ३-७४-२ ॥

परीक्षितो मे बहुशो बाहुको नलशङ्कया।

रूपे मे संशयस्त्वेकः स्वयमिच्छामि वेदितुम्॥ ३-७४-३ ॥

स वा प्रवेश्यतां मातर्मां वानुज्ञातुमर्हसि।

विदितं वाथ वाज्ञातं पितुर्मे संविधीयताम्॥ ३-७४-४॥

एवमुक्ता तु वैदर्भ्या सा देवी भीममब्रवीत्।

दुहितुस्तमभिप्रायमन्वजानाच्च पार्थिवः॥ ३-७४-५॥

सा वै पित्राभ्यनुज्ञाता मात्रा च भरतर्षभ।

नलं प्रवेशयामास यत्र तस्याः प्रतिश्रयः॥ ३-७४-६ ॥

तं तु दृष्ट्वा तथायुक्तं दमयन्ती नलं तदा।

तीव्रशोकसमाविष्टा बभूव वरवर्णिनी॥ ३-७४-७॥

ततः काषायवसना जटिला मलपङ्किनी।

दमयन्ती महाराज बाहुकं वाक्यमब्रवीत्॥ ३-७४-८॥

दृष्टपूर्वस्त्वया कश्चिद्धर्मज्ञो नाम बाहुक।

सुप्तामुत्सृज्य विपिने गतो यः पुरुषः स्त्रियम्॥ ३-७४-९ ॥

अनागसं प्रियां भार्यां विजने श्रममोहिताम्।

अपहाय तु को गच्छेत्पुण्यश्लोकमृते नलम्॥ ३-७४-१० ॥

किं नु तस्य मया कार्यमपराद्धं महीपतेः।

यो मामुत्सृज्य विपिने गतवान्निद्रया हृताम्॥ ३-७४-११ ॥

साक्षाद्देवानपाहाय वृतो यः स मया पुरा।

अनुव्रतां साभिकामां पुत्रिणीं त्यक्तवान्कथम्॥ ३-७४-१२ ॥

अग्नौ पाणिगृहीतां च हंसानां वचने स्थिताम्।

भरिष्यामीति सत्यं च प्रतिश्रुत्य क्व तद्गतम्॥ ३-७४-१३ ॥

दमयन्त्या ब्रुवन्त्यास्तु सर्वमेतदरिंदम।

शोकजं वारि नेत्राभ्यामसुखं प्रास्रवद्बहु॥ ३-७४-१४॥
अतीव कृष्णताराभ्यां रक्तान्ताभ्यां जलं तु तत्।
परिस्रवन्नलो दृष्ट्वा शोकार्त इदमब्रवीत्॥ ३-७४-१५॥
मम राज्यं प्रनष्टं यन्नाहं तत्कृतवान्स्वयम्।
कलिना तत्कृतं भीरु यच्च त्वामहमत्यजम्॥ ३-७४-१६॥
त्वया तु धर्मभृच्छ्रेष्ठे शापेनाभिहतः पुरा।
वनस्थया दुःखितया शोचन्त्या मां विवाससम्॥ ३-७४-१७॥
स मच्छरीरे त्वच्छापाद्दह्यमानो ऽवसत्कलिः।
त्वच्छापदग्धः सततं सो ऽग्नाविव समाहितः॥ ३-७४-१८॥
मम च व्यवसायेन तपसा चैव निर्जितः।
दुःखस्यान्तेन चानेन भवितव्यं हि नौ शुभे॥ ३-७४-१९॥
विमुच्य मां गतः पापः स ततो ऽहमिहागतः।
त्वदर्थं विपुलश्रोणि न हि मे ऽन्यत्प्रयोजनम्॥ ३-७४-२०॥
कथं नु नारी भर्तारमनुरक्तमनुव्रतम्।
उत्सृज्य वरयेदन्यं यथा त्वं भीरु कर्हिचित्॥ ३-७४-२१॥
दूताश्चरन्ति पृथिवीं कृत्स्नां नृपतिशासनात्।
भैमी किल स्म भर्तारं द्वितीयं वरयिष्यति॥ ३-७४-२२॥
स्वैरवृत्ता यथाकाममनुरूपमिवात्मनः।
श्रुत्वैव चैवं त्वरितो भाङ्गस्वरिरुपस्थितः॥ ३-७४-२३॥
दमयन्ती तु तच्छ्रुत्वा नलस्य परिदेवितम्।
प्राञ्जलिर्वेपमाना च भीता वचनमब्रवीत्॥ ३-७४-२४॥